DOI: 10.3126/dristikon.v16i1.95164

# संस्कृतस्यानुसन्धाने सामग्रीविश्लेषणस्य विधयः

**महानन्दतिमिल्सिना, विद्यावारिधीः[1], भवानीशङ्करभट्टराई, विद्यावारिधीः[2] तथा कृष्णप्रसादभण्डारी, विद्यावारिधीः[3]**

**[1]मूललेखकः**

सहप्राध्यापकः

साहित्यम्

नेपाल-संस्कृत-विश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः

🖂: timsinamahananda@gmail.com

**[2]सहलेखकः**

सहप्राध्यापकः

व्याकरणम्

नेपाल-संस्कृत-विश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः

🖂: dikshitbhattarai072@gmail.com

**[3]सहलेखकः**

सहप्राध्यापकः

अङ्ग्रेजी

नेपाल-संस्कृत-विश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः

🖂: krishna.bhandari0331@gmail.com

---

***Paper: Submitted: 2026-01-13, Accepted: 2026-05-18 & Published: 2026-05-29***

**शोधसारः**

अस्मिन् लेखे संस्कृतानुसन्धाने प्रयुज्यमानानां सामग्रीविश्लेषणविधीनां समीक्षणं विद्यते। सामग्रीसङ्कलनं निम्नलिखितपद्धतिष्वैकस्या उपयोगेन भवति - क्षेत्रकार्यं, प्रतिरूपचयनं, पुस्तकालयकार्यमित्यादयः। अनुसन्धानार्थं प्रतिरूपचयनम्, प्रश्नावली, मतनिर्वाचनम्, साक्षात्कारम्, मतसर्वेक्षणमित्यादीनां निर्माणकार्यं शोधभाषायां यन्त्रनिर्माणमुपकरणनिर्माणं वा कथ्यते। एवं प्रकारेण शोधकर्त्रा निर्मितादुपकरणादन्वेषणीयानां विषयसम्बद्धानामावश्यकसामग्रीणां सङ्ग्रहणं क्रियते, तथा च विशेषज्ञानां मतञ्च योजयित्वान्यैः साधनैः परिष्कृत्य विश्लेषणीयसामग्री निर्मीयते। तदनु ताः सामग्र्यः शोधस्य विविधपद्धतिभिर्विश्लेष्य निष्कर्षो निस्सार्यते। सङ्गृहीतसामग्रीणां विश्लेषणस्य पद्धतयः प्रक्रियाश्च विषयस्य स्वरूपानुसारेण भिन्ना भवन्ति। गुणात्मकेऽनुसन्धाने प्रायः सामग्रीणां व्याख्याने विश्लेषणे च वर्णनात्मक-व्याख्यात्मक-विश्लेषणात्मक-तुलनात्मकानां विधीनामुपयोगो क्रियते। प्रौढमनोरमा-लघुशब्देन्दुशेखर-रसगङ्गाधर-काव्यप्रकाशादीनां संस्कृतपुस्तकानां शोधकार्ये न केवलं व्याख्यात्मक-विश्लेषणात्मकादिविधयोऽपि

तु समीक्षात्मक-भाष्यात्मकविधयोऽपि सामग्रीविश्लेषणार्थं प्रयुज्यन्ते। शोधसमस्यानां प्राज्ञिकसमाधानार्थमावश्यकसामग्रीसङ्कलनस्य पद्धतिः प्रकाशितव्या। अनुसन्धानविधौ प्राथमिकस्रोतसामग्री, द्वितीयकस्रोतसामग्री, पुस्तकालयस्याध्ययनम्, क्षेत्रीयं प्रयोगशालीयं वाध्ययनञ्च निर्दिष्टं भवेत्। अस्मिन् लेखे समस्याकथने निर्धारितो मुख्यो विषयो वस्तुतथ्यनिस्सारणे केन्द्रितोऽस्ति। लेखेऽस्मिन् द्वितीयकसामग्रीणां पुस्तकालयकार्यस्य चाधिकः प्रयोगो विद्यते। अत्र वर्णनात्मकस्य विश्लेषणात्मकस्य च प्रमुखविधीनामनुसरणं कृत्वा प्रस्तुतं लेखं सार्थकं कर्तुं प्रयत्नः कृतो वर्तते।

*शब्दकुञ्जी :* अनुसन्धानपद्धतिः, विश्लेषणम्, संस्कृतानुसन्धानम्, संस्कृतवाङ्मयम्, सामग्रीसङ्कलनम्

---

## विषयपरिचयः

पूर्वीयपरम्परायामनुसन्धानमन्वेषणं चेति शब्दानामर्था अज्ञाततथ्यानामुद्घाटनम्, ज्ञाततथ्यानां विशिष्टीकरणर्थात् प्रमाणद्वारा परीक्षणेन निष्कर्षाणां स्थापनम्, कार्यकारणसम्बन्धमाध्यमेन वस्तुनः परीक्षणेन निष्कर्षनिष्पादनत्यादयो ज्ञायन्ते। (आचार्यः, २०४२, पृ.१) संस्कृतपरम्परायां दर्शनानुसारं वस्तुसिद्धये विभिन्ना विधयो दृश्यन्ते। न्यायवैशेषिकदर्शनं प्रतिज्ञा-उदाहरण-उपनयन-निगमद्वारा यथार्थतां साधयति। केचन नैयायिकाः कार्यकारणसम्बन्धनेन वस्तुसिद्धिं कुर्वन्ति, अन्येऽन्वय-व्यतिरेकविधिना वस्तुसिद्धिं कुर्वन्ति। तथा चान्यानि दर्शनानि शास्त्राणि अपि स्वविधि-तर्क-सिद्धान्तैरन्वेषणीयं वस्तु सम्यगन्विष्य तस्माद् निष्कर्षं निष्कासयन्ति। एवं पौरस्त्यवाङ्मये परीक्षणद्वारा परिष्कृतं सुवर्णतुल्यं कान्तियुतं वस्तुतथ्यमनुसन्धानं स्वीक्रियते। एतदतिरिक्तं विचारः, संयोगः, गवेषणा, अनुसरणमित्यादिष्वर्थेष्वपि शोधस्य प्रयोगो भवतीति विषयः शोधकर्त्ता भगीरथप्रसादत्रिपाठी स्वकीये शोधविधिसम्बद्धे 'अनुसन्धान पद्धति' इति पुस्तके उल्लिखति (त्रिपाठी, १९६०, पृ. १)। एवं प्राचीनसंस्कृतपरम्परायामज्ञाततथ्यानां आविष्कारः, परिष्कारः, पुनर्व्याख्या, भाष्यः, टिप्पणी, समालोचना, विचारः इत्यादिष्वर्थेषु शोधस्य प्रयोगो दृश्यते। अनुसन्धानप्रकाशनामकग्रन्थस्य प्रणेत्रा हरिप्रसादाचार्येण बृहत्ब्रह्मसंहितायां संस्कृतानुसन्धानं निम्नानुसारेण परिचायितमस्तीति प्रकाशितं विद्यते -

कार्यकारणभावस्य द्रव्याणां गुणकर्मणोः।
परीक्ष्य स्थापनं सम्यगनुसन्धानमुच्यते॥
अन्वेषणं पर्येषणं गवेषणमथापि च ।
शोध इत्यादि पर्यायैर्लोके समभिधीयते॥ (आचार्य, २०४२ पृ.१)

कार्यकारणभावसम्बन्धैर्द्रव्य-गुण-कर्मादीनि परीक्ष्य सम्यक् स्थापनमेवानुसन्धानम्। अस्य पर्यायवाचकत्वेन अन्वेषणम्, पर्येषणम्, गवेषणम्, शोधश्चेत्यादयः शब्दा प्रयुक्ताः सन्तीति श्लोकस्यास्य भावः।

**समस्याकथनम्**

संस्कृतानुसन्धाने सामग्रीविश्लेषणप्रक्रियां कथं प्रस्तोतुं शक्यत इति सन्दर्भे निम्नलिखिता समस्या प्रदर्श्यते -

क) संस्कृतानुसन्धानक्रमे सामग्रीविश्लेषणप्रक्रियां केन प्रकारेण प्रस्तोतुं शक्यते ?

**उद्देश्यकथनम्**

प्रस्तुतस्य शोधलेखस्योद्देश्यं यथा -

क) संस्कृतानुसन्धाने सामग्रीविश्लेषणप्रक्रियायाः स्पष्टीकरणम्।

**सैद्धान्तिकः पर्याधारः**

अनुसन्धेयस्य विषयस्य कस्माद् दृष्टिकोणादध्ययनं विश्लेषणञ्च विधेयमिति सैद्धान्तिकावधारणायां प्रस्तूयते। पौरस्त्य-पाश्चात्ययोर्विभिन्नानां सैद्धान्तिकीनां मान्यतानामाधारेणानुसन्धेयस्य विषयस्य विश्लेषणं विधीयते। काव्यहेतु-काव्यप्रयोजन-रस-ध्वनि-रीत्यलङ्कार-छन्दोगुणादीनां सिद्धान्तानामाधारेणानुसन्धेयस्य विषयस्य ग्रन्थस्य वा विवेचनं कर्तव्यम्। एवञ्च शोधविषयानुसारेण मनोविज्ञान-समाजशास्त्र-दर्शनेतिहास-भाषाशास्त्रादीनां सैद्धान्तिकावधारणाया आधारेणानुसन्धानं विधातुं शक्यते। भाषिकशोधसम्बद्धा सैद्धान्तिकी संरचना शोधशीर्षकानुरूपेणैतिहासिक-वर्णनात्मक-प्रयोगात्मकादीभ्यः शाखाप्रशाखाभ्यः प्राप्यते। यथा- मेघदूतं खण्डकाव्यं रस-ध्वन्यलङ्कार-छन्दोसंस्कृति-पर्यावरणादिभ्यो विभिन्नेभ्यः सिद्धान्तेभ्योऽध्ययनं विश्लेषणं विधीयते। अस्मिन्ननुसन्धाने भाषासाहित्यक्षेत्रस्य वर्णनात्मक-समीक्षात्मकेष्वनुसन्धानेषु संलक्षितानां वर्णनात्मक-विश्लेषणात्मक-व्याख्यात्मकसिद्धान्तानामप्यनुसरणं कृतं विद्यते। अनुसन्धानमिदं मूलतः संस्कृतशोधपद्धतेः सैद्धान्तिकं पर्याधारमुररीकृत्य विहितमस्ति।

**अनुसन्धानविधिः**

संस्कृतानुसन्धानपरम्परायाः सर्वेक्षणाय आधुनिकानुसन्धानपद्धत्या सह संस्कृतसंशोधनपद्धतेस्तुलनां कर्तुं नेपालभारतयोर्विभिन्नपुस्तकालयानां क्षेत्रभ्रमणं कृत्वा द्वितीयकस्रोतसः सामग्र्यः संगृहीताः सन्ति। अस्मिन् क्रमे शोधपद्धतिसम्बद्धानि पुस्तकानि, प्रबन्धाः, निर्देशिकाश्चोपयुक्ता विद्यन्ते। सामग्रीसङ्ग्रहप्रक्रियायां यथासम्भवं संस्कृतविशेषज्ञानं साक्षात्कारं कृत्वा प्राथमिकस्रोतसामपि उपयोगः कृतोऽस्ति। संस्कृतस्य पूर्वशोधपद्धतिः कीदृशी आसीत् इति ज्ञातुं प्राचीनसंस्कृतशोधपरम्परां पृष्ठभूमिरूपेण प्रकाश्य उद्देश्यपूर्णप्रतिलिपिचयनपद्धत्या विहितसामग्रीणां संयोजनं कृतमस्ति। सङ्गृहीतसामग्रीणां वर्णनात्मक-तुलनात्मकावधारणात्मकानाञ्च सिद्धान्तानामुपयोगेन विश्लेषणं विहितं वर्तते। तथा च मानकसिद्धान्तानुसारं परीक्ष्य सत्यापनञ्च विधाय तस्माद् निष्कर्षा गृहीताः सन्ति। अस्मिन् क्रमे सामग्रीविश्लेषणविधिर्निगमनात्मको दृश्यते।

**पूर्वकार्यसमीक्षा**

संस्कृतानुसन्धाने सामग्रीविश्लेषणस्य पद्धतय इति लेखेन सम्बद्धानि कानिचन प्रमुखानि पूर्वाध्ययनानि कालक्रमेण निम्नलिखितरूपेण प्रस्तुतानि सन्ति -

त्रिपाठी (ई.१९५९) संस्कृतभाषायां लिखिते *शोधपद्धतिः* इति ग्रन्थे प्राच्यसंशोधनस्य पद्धतिं रूपरेखाञ्च प्रस्तौति। असौ तस्य वैज्ञानिकविधिञ्च विवेचयति। शोधाधिकारी, विषयचयनम्, सामग्रीसङ्ग्रहः, पुस्तकस्य प्रारूपम्, शोधस्य वास्तविकस्थितिश्चेति विषयेष्वप्यसौ चर्चां करोति।

आचार्य-गौतम (२०४२) लेखकाभ्यां संस्कृतभाषायां लिखिते *शोध-प्रकाश*नामके पुस्तके प्राच्य-शोधस्य समुचितविधिविषये निर्देशः प्रस्तुतोऽस्ति। तस्य पुस्तकस्य द्वितीयप्रकरणे सामग्रीसङ्ग्रहस्य पद्धतयः, सामग्रीप्रकाराः, पुस्तकालयस्य उपयोगाय नियमाः, सन्दर्भसामग्रीणां सूचीकरणम्, शोधविधयः, विषयवस्तूनां परीक्षणस्य कार्यकारण- अन्वयव्यतिरेकविधिः, प्रबन्धनसङ्गठनञ्चेत्यादीनां विषयाणां चर्चा विहिताः प्राप्यन्ते।

द्विवेदी (ई. १९९७) सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेन प्रकाशितायां सरस्वतीसुषमायां शोधप्रधानपत्रिकायां कस्यापि काव्यस्य व्याख्यायामवलम्बनीया प्रक्रिया निम्नलिखितेनाधारेण भवतीति प्रकटयति - सन्दर्भपरिचयः, शब्दकोशः, विश्लेषणम्, गुण-अलंकार-रीति-रस-ध्वनि-वक्तोक्त्यात्यादीनामन्वेषणम्, सन्दर्भ-सूचना, छन्दःउल्लेखः, कोशसङ्केतः, भावनिर्धारणञ्चेत्यादिविषया व्याख्यानस्याधाररूपेण समागच्छन्ति, अतो मल्लिनाथप्रभृतिभिर्व्याख्यातृभिरेतेषां प्रमाणानामाधारेण विषयव्याख्यानं कृतमिति प्रमाणरूपेण उल्लिखितमस्ति।

चालीसे (२०७०) द्वारा सम्पादितेन च नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रेण काष्ठमण्डपेन प्रकाशितायाम् *अनुन्धानप्रकाश*नामिकायां पत्रिकायां प्रतिवर्षमनेन विश्वविद्यालयेन क्रियमाणानां विविधप्रकाराणामनुसन्धानानां कृते आवश्यकानां पद्धतीनां तत्प्रविधीनाञ्च उल्लेखः कृतो दृश्यते। तत्रानुसन्धानस्य स्वरूपं कीदृशं भवेदिति सन्दर्भे एम.एल.ए. पद्धते आधारभूतानि तत्त्वानि प्रस्तुतानि सन्ति।

द्विवेदी (ई.२०१७) इत्यनेन *संस्कृतशोधप्रविधि* इति हिन्दीपुस्तकं प्रकाशितम्, यस्मिन् संस्कृतशोधविधीनां प्रविधीनाञ्च चर्चा कृता अस्ति। तस्य प्रथमेऽध्याये शोधस्य परिचयः, शोधस्य प्रयोजनम्, तस्योपयोगिता, शोधस्य विविधाः सन्दर्भाः, शोधस्य पद्धतय इत्यादिषु विषयेषु प्रकाशितमस्ति। तथैव द्वितीयेऽध्याये शोधप्रविधौ प्रविधेरर्थः, संस्कृतवाङ्मये शोधस्य इतिहासः, संस्कृतशोधस्य प्राचीना पद्धतिः, शोधस्य समीक्षायाश्च विषयाः प्रस्तुताः सन्ति। तथैव तृतीयेऽध्याये विषयचयन-सर्वेक्षण-प्रारूपनिर्माणादिषु विषयेषु विवेचनं प्राप्यते। एवञ्चात्रैव सामग्रीसङ्कलन-लेखनविधि-टङ्कन-रूपसज्जा-पादटिप्पणीप्रयोग-ग्रन्थसूचीनिर्माणादिषु विषयेषु च विश्लेषणं दृश्यते।

उपरि प्रस्तुतानां पूर्वाध्ययनानामाधारेण संस्कृतशोधस्य सामग्रीविश्लेषणविधावेव केन्द्रितं विशेषाध्ययनं नैव जातं दृश्यते। संस्कृतशोधस्य सामग्रीविश्लेषणविधौ दृश्यमाना समस्यैव शोधान्तरालम्। अतोऽस्य शोधान्तरालस्य पूरणार्थं 'संस्कृतस्यानुसन्धाने सामग्रीविश्लेषणपद्धतयः' इति शीर्षकमौचित्यपूर्णं प्रतीयते।

## विषयविश्लेषणं परिणामश्च

### संस्कृते सामग्रीविश्लेषणस्य विधयः प्रक्रियाश्च

सङ्गृहीतसामग्रीणां विश्लेषणं कथं करणीयम् इति विषयो विश्लेषणस्य विधौ प्रक्रियायाञ्चान्तर्भवति। भाषासाहित्ययोरधिकेषु शोधेषु वर्णनात्मकपद्धतिः (सङ्गृहीततथ्यानां केवलं वर्णनेन लेखनपद्धतिः), व्याख्यानपद्धतिः (साहित्यिक-भाषिकयुक्तीनां माध्यमेन विषयविस्तारस्य पद्धतिः), विश्लेषणपद्धतिः (पक्षविपक्षमाध्यमेन विषयस्य वर्णन-तुलना-खण्डन-विश्लेषणानां पद्धतिः) माध्यमेन विषयस्योत्थापनं वर्णनञ्च भवति। यस्य कस्यापि विधेः प्रयोगेनापि विनाधारेण विना स्रोतसा कोऽपि विषयः शोधे नैव लेखनीय इति संस्कृतस्य रघुवंशः, कुमारसम्भवञ्चेत्यादीनां महाकाव्यानां सूक्ष्मरूपेण व्याख्याविश्लेषणकर्तुर्टीकाकारस्य मल्लीनाथस्य विचारो यथा - "नामूलं लिख्यते किञ्चिद् अनपेक्षितमुच्यते" (विना आधारेण किमपि न लिख्यते, अनपेक्षितञ्च न लिख्यते) इत्यस्मात् स्पष्टीभवति। एवञ्चानुसन्धाने तर्कस्य महती भूमिका वर्तत इति विषय आचार्येण मनुना प्रस्तुतो वर्तते। वैदिकवाङ्मयसेवकाः तर्कविधिं मन्यन्ते, तर्कविधिना अन्वेषणं कृत्वा तथ्यं प्रमाणयन्ति (यस्तर्केनानुसन्धत्ते स धर्मो वेद नेतरः) इति प्रस्तुवन् असौ विशेषतया तर्कविधिं प्रस्तौति। अनुसन्धानस्य सन्दर्भेऽपि एतद् विशेषतया उल्लेखनीयं दृश्यते।

वेदमन्त्राणां व्याख्या कथं करणीया इति विषयप्रकाशनसन्दर्भे वैदिकभाष्यकार आचार्य उवटो निम्नलिखितविधिं प्रक्रियां चोल्लिखति -

अतिरिक्तं पदं त्याज्यं हीनं वाक्ये निवेशयेत् ।
विप्रकृष्टं तु सन्दध्यादानुपूर्व्यञ्च कल्पयेत् ॥
लिङ्गं धातुं विभक्तिञ्च योज्यं वाक्यानुलोमतः ।
यद्यत्स्याच्छन्दसां वाक्ये कुर्यात्तत्तु लौकिकम् ॥ (उवटः, ई.१९७८, पृ.३)

वैदिकमन्त्राणां व्याख्याने मन्त्रेषु यानि पादपूरणार्थमेव समागतानि अतिरिक्तानि पदानि प्रयुक्तानि सन्ति, तानि पदानि त्याज्यानि । आवश्यकानि पदानि पूर्ववाक्येभ्यः आनेतव्यानि भवेयुः । मन्त्रं प्रपूर्यास्य व्याख्या करणीया । वेदेषु उपसर्गादयः कदाचित् तदनुरूपेभ्यः सन्दर्भेभ्यो दूरं भवन्ति, व्याख्यायां तानि पदानि अन्वयेन समीपं नीत्वा व्याख्या कर्तव्या । मन्त्रस्य प्रथमपादे विद्यमानानि पदानि आवश्यकतानुसारं द्वितीये तृतीये वा पादेषु योजितानि भवेयुः । ऋचां व्याख्याने आवश्यकतानुसारेण विधिः प्रक्रिया चावलम्बनीया । यदि पूर्वमन्त्रेषु लिङ्ग-धातु-विभक्तीनां वैभिन्येऽपि आवश्यकतानुसारेण तेषां परिवर्तनं विधाय व्याख्यानं कर्तव्यम् । अनेन प्रकारेण वैदिकमन्त्राणां व्याख्यानकाले समुचिता प्रक्रिया स्वीकरणीया इति वेदव्याख्यातारः प्रस्तुवन्ति ।

वैदिकमन्त्राणामन्यानां प्राचीनमन्त्राणां श्लोकानाञ्च व्याख्यानं कथं करणीयमित्यस्मिन् विषये निरुक्तकारो यास्कः स्वग्रन्थस्यारम्भे प्रस्तौति -

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ (यास्कः,२०२७, ३) ।

निरुक्तकारानुसारेण वैदिकमन्त्रामन्यासां प्राचीनसामग्रीणां पञ्चधा व्याख्यातुं शक्यन्ते - वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातुयोगश्च ।

निरुक्तमिति वेदव्याख्यानग्रन्थः । निरुक्तकारेण नैकाभिर्युक्तिभि वेदानां कठिनतमानां मन्त्राणां व्याख्या विहिता । निरुक्तव्याख्याने कानि कानि तत्त्वानि आवश्यकानि भवन्तीति प्रश्नस्योत्तरे निरुक्तस्य आधुनिकभाष्यकारेण दुर्गाचार्येण तत्र प्रयुक्ता युक्तयः प्रक्रियाश्चाधो प्रस्तूयन्ते यथा -

तत्त्वपर्यायशब्देन व्युत्पत्तिश्च द्वयोरपि ।
निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे (दुर्गाचार्यः, २००२, ७०) ।

तत्त्व-पर्याय-भेद-सङ्ख्या-सन्दिग्धोदाहरण-निर्वचन/व्युत्पत्ति-वैदिकोदाहरण-निर्णयानां प्रयोगेण वैदिकमन्त्राणां व्याख्यानं कर्तुं शक्यते ।

पौरस्त्यदर्शनस्यैकस्यां शाखायां जैमिनिदर्शने विषयव्याख्यानस्य पञ्चविधयुक्तयः प्रदर्शिताः सन्ति, तत्र - विषयः, विशयः/संशयः, पूर्वपक्षः, सिद्धान्तः, सङ्गतिश्च । दर्शनसङ्ग्राहकस्य सर्वदर्शनसङ्ग्रहपुस्तकस्य जैमिनीदर्शनखण्डे सङ्कलको माधवाचार्यः कुमारिलभट्टस्य विषयव्याख्यानशैलीं प्रस्तुत्य लिखति - स्वाध्यायोऽध्येतव्यः । एष विषयः । वेदाः कठिनविषयाः, तेषां दृश्यादृश्यफलानि सन्ति, केचन वेदानामध्ययनेन स्वर्गः प्राप्यते, केचन स्वर्गो न प्राप्यते, वेदपठनेन लाभो नास्ति, अतोऽस्माभिर्वेदः पठितव्यो न वा ? इति संशय उत्पद्यते । अस्य पूर्वपक्षस्य समर्थका वदन्ति यत् यथा रामायण-महाभारतादिवद् वेदानामपि सामान्य-

प्रकारेणाध्ययनं कर्तुं शक्यते, तस्य विधिपूर्वकमध्ययनमावश्यकं न, अतो वेदा विधिपूर्वकं पठितव्या इति विचारः सम्यक् नास्ति। इदं पूर्वपक्षमतं प्रति सिद्धान्तसमर्थकाः कथयन्ति यत् - विधिपूर्वकेनाध्ययनेनैवार्थस्य ज्ञानं सम्भवति, अतस्तस्याध्ययनमावश्यकम्। एवं सर्वदर्शनसङ्ग्रहकारेण भाष्यकारकुमारिलभट्टस्य मतमुद्धृत्य वेदानां विधिपूर्वकमध्ययनमावश्यकमस्तीति उपस्थानवाक्येन सह सिद्धान्तपक्षस्य सङ्गतत्वात् स्वाध्यायोऽध्येतव्य एतत् वचनं समुचितमस्ति (माधवाचार्यः, ई. १९६४, ५२१ - ५३४)।

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्चेति पञ्चैते शास्त्रेऽधिकरणं स्मृतम् (उमाशङ्कर, व्या., ई.१९६४, ५२२)।

विषयप्रवेशः, उद्धृतविषये संशयः, पूर्वपक्षीयेन तर्केन विषयस्य खण्डनम्, उत्तरपक्षद्वारा पूर्वपक्षस्य खण्डनम, उत्तरपक्षस्य स्थापनम्, सिद्धान्तमते सङ्गतिश्चेति पञ्च शास्त्रविश्लेषणस्य आधारतत्त्वानि ।

संस्कृतमूलग्रन्थेषु भाष्यग्रन्थेषु वा विस्तरेण विषयवस्तुविश्लेषणस्य परम्परा वर्तते। पूर्वपक्षीयजनानां विचाराणां तार्किकरूपेण खण्डनमण्डनस्य प्राचीनपरम्परा अस्ति। संस्कृतवाङ्मये विषयस्य स्वरूपानुसारं विश्लेषणविधिरस्ति। संस्कृतसाहित्ये निम्नलिखिततत्त्वेषु केन्द्रीकृत्य विषयाणां विश्लेषणं जायमानं वर्तते -

सन्दर्भोऽथ प्रसङ्गश्च विग्रहश्चान्वयक्रमः
कवेरिष्टश्च शब्दार्थो गुणालङ्काररीतयः।
रसो ध्वनिश्च वक्रोक्तिः शब्दसन्दर्भसूचना
छन्दःकोशादिसङ्केतो भावसाम्यप्रदर्शनम्।
इत्येतान्येव तत्त्वानि यथा लब्धानि काव्यतः।
काव्यव्याख्यासु चीयन्ते मल्लीनाथादिसूरिभिः॥ (द्विवेदी, २०३२, पृ. ५४६)।

सन्दर्भः, प्रसङ्गः, विग्रहः, अन्वयक्रमः, इष्टशब्दस्य व्याख्या, शब्दार्थः, गुणः, अलङ्कारः, रीतिः, रसः, ध्वनिः, वक्रोक्तिः, शब्दसन्दर्भसूचना, छन्दः, कोशादिसङ्केतः, भावसाम्यप्रदर्शनञ्चेति मल्लिनाथादिभिर्भाष्यकारैः काव्यव्याख्यासु निर्धारितानि तत्त्वानि सन्ति। संस्कृतपरम्परायां विषयस्य व्याख्यानविश्लेषणविधयः प्रायो दर्शनशास्त्रे दृश्यन्ते। दर्शनशास्त्राणि कस्यचित् विषयस्य परिचयं प्रदाय तस्मिन् विषये स्वमतानि विचाराश्च प्रस्तुत्य व्याख्यानविश्लेषणखण्डनमण्डनादीनां विविधविधीनां प्रयोगं कुर्वन्ति। तथा च व्याकरण-साहित्य-मीमांसादिषु सैद्धान्तिकेषु ग्रन्थेषु विषयप्रवर्तन-व्याख्यान-विश्लेषण-खण्डनमण्डनार्थमपि एतादृशाः पद्धतयः प्रयुज्यन्ते। रचनाया व्याख्यानविश्लेषणयोः सन्दर्भस्य, प्रसङ्गस्य, व्याख्या/व्युत्पत्तेः, कोशार्थप्रतिपादनस्य च प्रयोगो दृश्यते।

अभिनवगुप्तेन लिखित *अभिनवभारती* (ई.सं. १० शताब्द्याः उत्तरार्द्धे) साहित्यविषयकः प्रामाणिको ग्रन्थो मन्यते। अस्य प्रबन्धस्य आरम्भे तेन शास्त्रीयविषयाणां कविताकाव्यानाञ्च स्वकीया व्याख्यानशैली निर्धारिता। एनां शैलीं व्याख्याय स लिखति -

उपादेयस्य सम्पाठः तदस्यस्य प्रतीकनम्।
स्फुटव्याख्या विरोधानां परिहारः सुपूर्णता॥
लक्ष्यानुसरणं श्लिष्ट-वक्तव्यांशविवेचनम्।
सङ्गतिः पौनरुक्त्यानां समाधानसमाकुलम्।

सङ्ग्रहश्चेत्ययं व्याख्याप्रकारोऽत्र समाश्रितः ॥ (अभिनवभारती, १, ५-७)।

(१) उपादेयपाठस्य ग्रहणम् (२) तद्भिन्नस्य अर्थात् अशुद्धस्य अस्वीकार्यस्य च पाठस्य परित्यागः, आवश्यके सति संशोधनञ्च (३) स्पष्टव्याख्यानम् (४) विरोधिवाक्यानां परिहारः (५) विषयस्य पूर्णतापूर्वकं प्रस्तुतिः (६) उदाहरणस्य अनुसरणं कृत्वा तस्योचितस्थाने स्थापनम् (७) उदाहरणसम्बद्धस्यांशस्य व्याख्यानपूर्वकमुदाहरणे सङ्गतिः (८) पुनरावृत्तिदोषनिवारणपूर्वकं सङ्गतिः (९) विस्तृतव्याख्याने प्रस्तूतानां विषयानां संश्लेषः, एता नवसङ्ख्यका युक्तय अस्मिन् व्याख्याने प्रयुक्ताः सन्तीति प्रस्तुतस्य श्लोकस्याशयः।

यद्यपि अभिनवगुप्तेन रससूत्रव्याख्यानस्य, ध्वनिवादस्थापनायाश्च सन्दर्भे स्वस्य शास्त्रीयमतप्रतिपादनार्थं एतेषामाधारानां प्रयोगो भविष्यतीति उल्लेखः कृतः तथाप्येते आधारा अन्येषां शास्त्रीयग्रन्थानां व्याख्याने, समालोचनायां, भाषासाहित्यसम्बद्धानां शोधविषयाणां व्याख्याने च प्रासङ्गिका दृश्यन्ते।

**सामग्रीविश्लेषणस्य शास्त्रीयविधयः**

अनुसन्धानस्य प्रकृत्यनुसारं सामग्रीविश्लेषणस्य परीक्षणस्य च पद्धतयः प्रक्रियाश्च भिन्ना भवन्ति। भाषासाहित्यक्षेत्रस्य वर्णनात्मक-समीक्षात्मकेष्वनुसन्धानेषु प्रायो वर्णनात्मक-विश्लेषणात्मक-व्याख्यात्मकप्रकृतीनां विश्लेषणविधीनामुपयोगो दृश्यन्ते। अत्र एतादृशानां केषाञ्चनानां प्राचीनानां विधीनां क्रमेण चर्चा कृताऽस्ति।

**वर्णनात्मकः**

वर्णनात्मकमनुसन्धानं केवलं कस्या अपि घटनायाः, विषयस्य, परिस्थितेः, जनानां प्रवृत्तेश्च वर्णनं करोति। अनुसन्धानमेतत् प्रत्यक्षतया गुणस्य, तथ्यस्य च वर्णनं करोति। यस्मिन् अनुसन्धाने व्याख्यानम्, विश्लेषणम्, आलोचना च न भवति, अपितु केवलं विशिष्टविषयस्य घटनायाश्च वर्णनं भवति, एतद् वर्णनात्मममनुसन्धानम्। अस्मिन् प्रकारकेऽनुसन्धाने विविधेषु विषयेषु शोधकर्तुर्नियन्त्रणं न जायते, सः केवलं किं घटितम्, किं वा भवतीति वर्णनं कर्तुं शक्नोति, तस्मिन् कार्ये सर्वेक्षणपद्धतीनां प्रयोगो भवतीति शोधकर्ता दुर्गाबहादुरघर्ती उल्लिखितवान् (पृष्ठः १४)। अतः तस्य उद्देश्यं केवलं छायायन्त्रेण गृहीतं छायाचित्रमिव दृश्यमानस्य विषयस्य घटनाया वा केवलं वर्णनं भवतीति ज्ञायते। संस्कृतेर्व्यक्तिवृत्तस्य परिचयः, व्यक्तित्वस्य प्रकाशनम्, पुस्तकस्य समीक्षणम्, ऐतिहासिकानां विषयाणां वर्णनञ्चनेन विधिना विधीयते। नेपालसंस्कृतविश्वविद्यालयाद् भारतीयविश्वविद्यालयाच्च सम्पन्नाः केचन विद्यावारिधिशोधप्रबन्धा वर्णनात्मका दृश्यन्ते।

**व्याख्या-विश्लेषणात्मकः**

व्याख्यात्मकेऽनुसन्धाने सङ्कलितानां सामग्रीणां व्याख्यानं जायते। एतादृशमनुसन्धानं परिस्थितेर्दृश्यघटनायाश्च द्वयोः पक्षयोः सम्बन्धः किमर्थं कथं चाभवदिति स्पष्टीकर्तुं प्रयतते। अस्मिन् विषयेऽनुसन्धाता दुर्गाबहादुरघर्ती शोधकर्तारं कुमाररञ्जितमुद्धृत्य उल्लिखति यत् - अनुसन्धानेऽस्मिन् कापि परिस्थितिर्घटना च कथं परिघटितेत्यादीनां वस्तूनां व्याख्यानं करोति (पृ.१४)। संस्कृतसाहित्ये बहुषु स्थानेषु व्याख्यानविधिनां प्रयोगो दृश्यते। परन्तु साहित्य-दर्शन-वेद-व्याकरणादिषु व्याख्यानस्याधारवैभिन्यात् क्षेत्रानुसारेण व्याख्यानस्याधारा निर्धारिताः। साहित्यिकग्रन्थस्य व्याख्यायामन्वय-व्युत्पत्ति-समास-शब्दार्थ-भावार्थप्रकाशन-छन्दोऽलङ्कार-गुण-रीति-ध्वन्यादीनां काव्यतत्त्वानामुपयोगो विधीयते। एवञ्च दर्शनशास्त्रे तु विषयस्य उत्थापनम्, उद्धृतविषये संशयप्रकाशनम्, तस्मिन् विषये पूर्वपक्षीयविचाराणां प्रस्तुतिः, सैद्धान्तिकदृष्टिकोणस्य प्रस्तुतिः, पूर्ववादैः सह

सङ्गतिञ्च प्रदर्श्य व्याख्या क्रियते। तथैव व्याकरणशास्त्रस्य व्याख्याने पूर्वोक्ताभ्यो भिन्ना युक्तयः प्रयुज्यन्ते। व्याकरणेऽपि वाक्यपदीय-भूषणसारादीनां दार्शनिकानां ग्रन्थानां व्याख्यासन्दर्भे तत्रापि दार्शनिकयुक्त्याः प्रक्रियाखण्डस्य च व्याख्यायान्वय-पदव्युत्पत्ति-पदसिद्धि-शङ्कादीन् प्रदर्श्य यौगिकार्थं तात्पर्यार्थञ्च निर्धार्य व्याख्या क्रियते। एवञ्च संस्कृतपरम्परायां विविधप्रकाराणामनुसन्धेयसामग्रीणां ग्रन्थानाञ्च व्याख्या स्वकीयं मानकमाश्रित्य विधीयते। कालिदासस्य ग्रन्थानां मल्लिनाथादिभिर्लिखिता टीका, सिद्धान्तकौमुदीं प्रति बालमनोरमाकारेण, तत्त्वबोधिनीकारेण लिखिता टीकाश्चैतादृशानां व्याख्यानामुदाहरणानि सन्ति।

विश्लेषणात्मकमनुसन्धानं व्याख्यात्मकादनुसन्धानात् किञ्चिद् भिन्नं भवति। विश्लेषणात्मकेऽनुसन्धाने प्राप्तानि तथ्यानि समीक्षार्थं मूल्याङ्कनार्थञ्च विश्लेषणं क्रियते। अस्यानुसन्धानस्य मुख्यं कार्यं चरयोः सम्बन्धः किमर्थं कथञ्च स्थापित इति व्याख्यानमस्ति। अस्मिन्ननुसन्धाने तथ्याङ्कसङ्ग्रहस्याधारेण कारण-प्रभावयोः सम्बन्धस्य व्याख्या विधीयते। यथा- शोधपद्धतिः इति पुस्तकस्य लेखकेन दुर्गाप्रसाददाहालेन उक्तं यत्- सामुदायिकविद्यालयानां छात्राः संस्थागतविद्यालयानां छात्राणामपेक्षया नेपालीभाषायां किमर्थमधिकं प्रवीणाः सन्तीति शोधप्रश्नस्याध्ययनं विश्लेषणात्मकमनुसन्धानं भवति (पृष्ठं ८)। अनुसन्धानमेतद् विद्यमानतथ्यानि सूचनाश्च समीक्षात्मकरूपेण प्रस्तौति।

विश्लेषणीयानां सामग्रीणां बाह्यैकपक्षीयसीमितञ्च विवेचनमेव व्याख्याऽस्ति, विश्लेषणं तु विषयस्य पृष्ठभूमिः, परिवेशः, प्रभावः, कारणस्य तुलना, अन्वयव्यतिरेकश्चेत्यादितत्त्वेष्वाधारितं व्याख्यानमस्ति। विश्लेषणेन तात्पर्यार्थः, ध्वन्यार्थः, प्रभावश्चेत्यादिविषयेऽप्यध्ययनं विधीयते, इदं समीक्षात्मकमध्ययनमप्यस्ति, परन्तु व्याख्यात्मकमध्ययनं तु समीक्षा न भवति। संस्कृतस्य व्याकरण-मीमांसा-न्यायादिविषयाणां स्फोटः, अभिधा, लक्षणा, व्यञ्जनादिसम्बद्धानि विस्तृतानि दीर्घाणि च व्याख्यानानि विश्लेषणस्योदाहरणानि सन्ति।

**तुलनात्मकः**

तुलनात्मकविधिर्द्वयोश्चरयोः समानतायाः विषमतायाश्च तुलनां कृत्वा तयोर्भेदं प्रदर्शयति। एतादृशी तुलना विविधघटना-कार्य-अवस्था-प्रक्रियादिविषये कर्तुं शक्यते। किन्तु तुलनीयाः सामग्र्यः परस्परं सदृशा भवन्ति चेत् तदैव तुलना फलदायी भवति।

**खण्डनमण्डनात्मकः/ समालोचनात्मकः**

स्वमतविरोधिनं विचारं तर्कपूर्णरीत्याऽसत्यमस्तीति प्रकाशनमेव खण्डनम्। सर्वलक्षणसङ्ग्रहनामके ग्रन्थेऽस्य परिभाषा एवं दत्ता अस्ति - 'स्वमतदोषपरिहारपूर्वकं परमतपदार्थनिराकरणम्।' स्वमते दृष्टदोषाणां निराकरणपूर्वकं परमतानां निराकरणमेव खण्डनम् (पृष्ठं ५२)। एवञ्च स्वस्य मतानां विचाराणाञ्च परिपोष एव मण्डनम्। संस्कृतस्य दर्शनपरकेषु शोधेषु अध्ययनेषु च खण्डनमण्डने अतीव लोकप्रिये स्तः। नैयायिका वैयाकरणानां मीमांसकानामन्येषाञ्च मतानि खण्डयन्ति, तदनु स्वकीयेन प्रमाणेन, तर्केन चाभीप्सितं मतं स्थापयन्ति। तथैवान्ये सिद्धान्तानुयायिनश्च नैयायिकानां वैयाकरणानाञ्च सिद्धान्तान् खण्डयित्वा स्वमतानि स्थापयन्ति सिद्धयन्ति वा। संस्कृते एषा खण्डन-मण्डनप्रक्रिया नाम्ना व्यवह्रियते। एषा प्रक्रिया निश्चितयुक्त्या, प्रमाणेन, तर्केण च सम्पन्ना भवति। तथैव खण्डनं मण्डनं चान्तर्दृष्टि-दर्शनादिनाऽऽधारेणापि सम्पत्स्यते।

**भाष्यात्मकः**

व्याख्यात्मकस्य विश्लेषणात्मकस्य च पद्धतीनामपेक्षया भाष्यात्मको विधिर्गभीरो विशिष्टश्च संलक्ष्यते। एतदनुसन्धानं व्याख्यानं विश्लेषणमनुशीलनञ्च। एतादृशानि भाष्यानि प्रायः सूत्रग्रन्थेष्वाधारितानि दृश्यन्ते, यथा- पाणिनीयसूत्रेषु कात्यायनीयवार्तिकेषु च भाष्यम्, बादरायणप्रणीतब्रह्मसूत्रे विहितानि अद्वैत-द्वैत-विशिष्टद्वैतवादीनामन्येषाञ्च भाष्यानि। भाष्यं परिभाषयन् एको विद्वान् कथयति -

सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥

यत्र सूत्रे समागतानां पदानामाधारेण सूत्रार्थस्य वर्णनं व्याख्यानञ्च विधीयते, एवमेव यत्र प्रतिपदानि व्याख्यानं क्रियते, तादृशान् ग्रन्थान् भाष्यविदो भाष्यं स्वीकुर्वन्ति।

उपर्युक्तेन व्याख्यानेन सूत्रे समाविष्टानां पदानां पक्षविपक्षत्वेन व्याख्यानम्, तेषां प्रयोजनानामुपस्थापनम्, भिन्नकोणात् समस्तपदात् समागतस्यार्थस्य परिचर्चा एव भाष्यमिति मन्यते। संस्कृतपरम्परायामेतादृशानि बहूनि भाष्यानि सन्ति। आचार्यः सायणो वेदानां प्रमुखो भाष्यकारोऽस्ति। एवञ्च यास्केन निघण्टुविषये भाष्यं रचितम्। तथा च बहुभिर्भाष्यकारैर्ब्रह्मसूत्रे स्वपक्षतो भाष्यं रचितम्। तथा च उपनिषत्सु, न्यायदर्शनेषु, मीमांसेषु, वेदान्तेषु, वैशेषिकसूत्रेषु, गीतायाञ्च भाष्यानि लिखितानि सन्ति। एभिः सर्वैरपि वर्ण्यसूत्रस्य विषयस्य वा सपदकृत्यं प्रकाशनम्, सान्दर्भिकस्यार्थस्य भावस्य वा औचित्यप्रकाशनञ्च विधीयते। आचार्यसायणेन वेदस्यार्थप्रकाशनक्रमेऽनेकेषामस्पष्टानाम्, द्वयर्थकपदानां कठिनानां वैदिकमन्त्राणामर्थनिर्धारणे भाष्यं रचितम्, अतो भाष्यमनुसन्धानयोग्यसामग्रीविश्लेषणस्य साधनं जातम् इति प्रतीयते।

**आगमनात्मक-निगमनात्मकः**

सूत्रादुदाहरणं प्रतीति निगमनस्यार्थो ज्ञायते। कमपि सूत्रं नियमं वा प्रस्तूय तस्याधो उदाहरणानि प्रकाश्य विषयप्रतिपादनमेव निगमनात्मको विधिः। अस्य वैपरीत्येन प्रथममुदाहरणं प्रस्तूय तस्यैव माध्यमेन नियमशिक्षणप्रक्रिया एव आगमनात्मको विधिः। संस्कृतस्य समीक्षाशास्त्राणि अनुसन्धानानि च प्रायो निगमनविधिनैव लिखितानि दृश्यन्ते। महर्षिपाणिनेरष्टाध्यायीतः आचार्यजगन्नाथस्य रसगङ्गाधरपर्यन्ता बहवो ग्रन्था निगमनविधिनैव रचिताः प्राप्यन्ते। आचार्यपाणिनिना रचिते 'उकालोज्झस्वदीर्घप्लुतः' (पा.सू.१-२-२७) इति सूत्रे तु आगमनविधेः सामान्यः सङ्केतो दृश्यते। तत्रासौ ह्रस्व-दीर्घ-प्लुतानां व्याख्यानप्रसङ्गे उ, ऊ, ऊ३ इति त्रयाणां वर्णानां उच्चारणे यावान् समय आवश्यकः, तावत् कालपर्यन्तोच्चारिताः सकला वर्णा ह्रस्व-दीर्घ-प्लुता भवन्तीति सिद्धान्तनिर्माणे प्रथममुदाहरणं प्रस्तुतमस्ति, अतोऽत्रागमनविधेः सङ्केतः प्राप्यते। एतदतिरिक्तमष्टाध्याय्यामपि प्रायो निगमनविधेः प्रयोगोऽवलोक्यते। अतः स्पष्टं भवति यत्- आचार्यपाणिनिकालादेव संस्कृतानुसन्धानस्य समीक्षायाञ्च प्रमुखव्याख्यानविधिरूपेण निगमनविधिः प्रचलितोऽस्ति।

**निष्कर्षः**

संस्कृतभाषायां कमपि ग्रन्थमाधारीकृत्य तस्य व्याख्या-विश्लेषण-समालोचनञ्च विधाय गभीरविषयेऽनुशीलनस्य सुदीर्घपरम्परा प्रचलती वर्तते। तुल्यगुणयुतयोर्विषययोस्तुलनां विधाय भाषायां काव्यशास्त्रे च विभिन्नदृष्टिकोणैर्भाष्यात्मकं व्याख्यानं क्रियमाणमस्ति। एवञ्च सांस्कृतिक-भौगोलिक-ऐतिहासिकविषयाणां वर्णनम्, अवलोकनञ्च विधाय शोधप्रबन्धाः संरचिता विद्यन्ते। अतः संस्कृतस्य भाषा-वाङ्मयसम्बद्धानि एतानि शोधक्षेत्राणि सन्ति। संस्कृते शोध्यविषयोपस्थापनविधिषु आगमन-निगमन-

खण्डनमण्डनादयः प्रचलिताः सन्ति। आचार्यपाणिनिकालात् संस्कृतानुसन्धानस्य समीक्षायाश्च प्रमुखव्याख्यानविधिरूपेण निगमनविधिः प्रचलितोऽस्ति। एतादृशानां विषयाणां व्याख्याने विश्लेषणे च व्याख्यानात्मकाः, वर्णनात्मकाः, भाष्यात्मकाः, विश्लेषणात्मकाः, तुलनात्मका विधयो दृश्यन्ते। अतः संस्कृतस्यानुसन्धाने सामग्रीविश्लेषणस्य वर्णनात्मकाः, व्याख्यानात्मकाः, तुलनात्मकाः, समालोचनात्मकाः, भाष्यात्मकाः, निगमनात्मकाः, आगमनात्मकाश्च विधयः प्रसिद्धा विद्यन्ते।

**कृतज्ञताज्ञापनम्**

अनुसन्धानमेतत् विश्वविद्यालय-अनुदान-आयोग-नेपालस्य स्वीकृतौ डा.भवानीशङ्करभट्टराई, डा.कृष्णप्रसादभण्डारी च सहितेन मया फ्याकल्टी-रिसर्चसमूहान्तर्गते सम्पन्नस्य 'संस्कृत अनुसन्धानपद्धति' इत्यनुसन्धानस्यांशिकप्रयोजनपरिपूर्तये विहितमस्ति। अनुसन्धानक्रमे विश्वविद्यालयानुसन्धानायोगेन आंशिकवृत्तिप्रदानेन वयमुपकृताः स्मः। अतो विश्वविद्यालयानुसन्धानायोगं प्रति प्रथमतः कृतज्ञतां व्यनज्मि। अनन्तरमनुसन्धानक्रमे सहाय्यविधातृभ्यः सर्वेभ्यो धन्यवादवचसा कार्तज्ञं निवेदयामि।

**सन्दर्भसामग्रीः**

आचार्यः, हरिप्रसादः स्थानेश्वरगौतमश्च (२०४२), *अनुसन्धानप्रकाशः*, महेन्द्र-संस्कृत-विश्वविद्यालयः।

उवट-महीधरौ (व्या.) (ई.१९७८), *शुक्लयजुर्वेदसंहिता*, मोतीलाल बनारसीदास।

चालिसे, नारायणः (सम्पा.), (२०७०) *अनुसन्धान–प्रकाशः* (वर्षः-६, पूर्णाङ्कः-३), नेसंवि-अनुसन्धानकेन्द्रम्।

त्रिपाठी, भागीरथप्रसाद (ई.१९५९), *अनुसन्धान पद्धति*, वाराणसेय-संस्कृत-विश्वविद्यालयः।

दाहालः, दुर्गाप्रसाद एवमन्ये (२०७५), *अनुसन्धान विधि*, एम.के. पब्लिसर्स।

दुर्गाचार्यः (व्या.), (ई.२००२), *निरुक्तम्*, चौखम्बा सुरभारती प्रकाशन।

द्विवेदी, प्रभुनाथ (ई.२०१७), *संस्कृत-शोधप्रविधिः*, महात्मागान्धी काशी विद्यापीठ।

नगेन्द्रः (ई.२०१८), *अनुसन्धानस्य प्रविधिप्रक्रिया* (अनु.हर्षनाथमिश्रः), राष्ट्रिय संस्कृत संस्थान।

माधवाचार्यः (ई.१९६४), *सर्वदर्शनसङ्ग्रहः*, चौखम्बा विद्याभवनम्।

यास्कः (ई.२००२), *निरुक्तम्*, (दुर्गाचार्यकृतव्याख्यासहितम्), चौखम्बा संस्कृतप्रतिष्ठानम्।